ं वर्षम् - ०२ अङ्कः - ०२ शोधज्योतिः
जनवरी-दिसम्बर, २०२० ISSN-2350-0700

# आधुनिकं काव्यप्रयोजनम्

**जिगरः एम. भट्टः[१]**

"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति प्रसिद्धमेव। किमपि कार्यं निष्प्रयोजनं नैव भवति। वेदाद् आरभ्य अद्यावधि जातं वाङ्मयं सर्वथा सप्रयोजनमेव वर्तते। अत एव भगवान् शेषावतारः पतञ्जलिः जगाद - ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।[२] अथ काव्यशास्त्रं किम्प्रयोजनं इति प्रश्ने भरतादयः आचार्याः स्वकीयग्रन्थेषु काव्यस्य प्रयोजनानि प्रोचुः। प्रसिद्धेषु प्रयोजनेषु चतुर्वर्गफलप्राप्तिः, लोकव्यवहारज्ञानं, यशः, कीर्तिश्च इत्यादीनि प्रयोजनानि भामहादिभिः आचार्यैः भावान्तरेण प्रोक्तानि एव। प्राचीनकाव्यशास्त्रे प्रायः समानानि प्रयोजनानि दृश्यन्ते। आधुनिकः कालः सर्वत्र परिवर्तनम् उपस्थापयति। काव्यशास्त्रे आधुनिकः प्रवाहः कानि प्रयोजनानि मनुते? किम् आधुनिकं प्रयोजनं किमपि विशिष्टम् ? यतोहि समयेन गच्छता काव्यस्य स्वरूपं, कारणं, प्रयोजनं च परिवर्तते एव। एतस्मिन् सन्दर्भे आधुनिककाव्यशास्त्रे प्रसिद्धानां त्रयाणाम् आचार्याणां मतानुसारं काव्यप्रयोजनं पुरस्क्रियते। ते त्रयः यथा - सनातनकवी रेवाप्रसादो द्विवेदी, त्रिवेणी कविः अभिराजराजेन्द्रमिश्रः, प्रो. राधावल्लभः त्रिपाठी। एतेषां क्रमेण काव्यालङ्कारकारिका, अभिराजयशोभूषणम्, अभिनवकाव्यालङ्कारसूत्रम् इति काव्यशास्त्रग्रन्थाः विद्यन्ते।

## काव्यालङ्कारकारिकानुसारं काव्यप्रयोजनम्

आचार्यो रेवाप्रसादः स्वरचितायां काव्यालङ्कारकारिकायां काव्यस्य निष्प्रयोजनवत्त्वं सप्रयोजनवत्त्वं चेति उभयं प्रतिपादयति अर्थात् आचार्यस्य मतानुसारं काव्यस्य प्रयोजनं नास्त्यपि, अस्त्यपि। कथमिदं सम्भवति यत् एकमेव वस्तु सप्रयोजनं निष्प्रयोजनं च भवति? अत्र सनातनकवीना उच्यते -

---

[१] सहायकाचार्यः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

[२] महाभाष्यम्, पस्पशाह्निकम्

**"प्रयोजनं कवेः काव्ये नापि किञ्चन दृश्यते।**
**चुङ्कृतौ कलविङ्कस्य यथा प्राभातिके क्षणे।।"[१]**

अर्थात् यथा प्रातःकाले कलविङ्कः पक्षी प्रयोजनं विना एव मधुरं रवं कुरुते तथैव काव्ये कवेः किमपि प्रयोजनं नापि भवति। अत्र अपि अव्ययेन आचार्यः काव्यस्य सप्रयोजनवत्त्वं स्वीकरोति। निष्प्रयोजने काव्ये अपरं दृष्टान्तं प्रदर्शयति आचार्यः। यथा -

**"एषणात्रितयोत्तीर्णे रामायणमहाकवौ।**
**आत्माविष्कार-नैष्कर्म्य-नैसर्गी किं प्रयोजनम्।।"[२]**

एषणा त्रिविधा भवति, लोकैषणा, वित्तैषणा, पुत्रैषणा च। एषणा अर्थात् कामना। आदिकविः वाल्मीकिस्तु तिसृभ्योऽपि एषणाभ्यो रहितः उत्तीर्णश्च आसीत्। सः निष्काम एव रामायणं विरचितवान्। इत्थं काव्यस्य निष्प्रयोजनवत्त्वं दृष्टान्तद्वयेन प्रोक्तम्।

काव्यं सप्रयोजनम् अपि भवति इति आचार्यः पञ्चकारिकाभिः प्रतिपादयति। एतानि प्रयोजनानि आधुनिकं कालं काव्यं च समीक्ष्य सर्वथा औचित्यपूर्णानि वर्तन्ते यथा - युगावश्यकतापूर्तिमन्त्रव्यक्तिः, धर्मरक्षा, राष्ट्रदेवप्रबोधः, सर्ववर्गपरिपोषणम् इति।

**"युगावश्यकतापूर्तिमन्त्रव्यक्तिरपि क्वचित्।**
**प्रयोजनं रघुव्यक्ती रघुवंशे यथा कवेः।।"[३]**

महाकविः कालिदासः रघुवंशे रघुं नायकं विधाय रामायणस्य कथाम् अर्थान्तरेण प्रदर्शितवान्। तेन नूतना सृष्टिः न रचिता अतः रघुवंशम् अर्थात् युगावश्यकतापूर्तये वाल्मीकिकृतस्य रामायणस्य अभिनवशैल्या मन्त्रव्यक्तिः। अतः इदं काव्यप्रयोजनं यत् कविः पुरातनम् अर्थं नूतनशैल्या समाजे प्रस्तुयात्।

काव्यं धर्मस्य रक्षणार्थम् अपि भवति। आचार्येण रेवाप्रसादेन कथ्यते -

**"अधर्मोत्थानवेलायां धर्मरक्षाऽपि दृश्यते।**
**काव्यार्थस्तुलसीकाव्ये यथा यवनशासने।।"[४]**

---

[१] काव्यालङ्कारकारिका - ११ (मूलकारिका)

[२] तत्रैव - १२ (मूलकारिका)

[३] तत्रैव - १३ (मूलकारिका)

[४] तत्रैव - १४ (मूलकारिका)

यवनानां दुष्टे शासने अधर्मस्य आधिक्ये अपि तुलसीदासेन रामायणकथानकं स्वीकृत्य रामचरितमानसं विरचितम्। तेन सनातनः धर्मः रक्षितः अतः काव्यं धर्मरक्षार्थम् अपि विरच्यते। राष्ट्रदेवस्य प्रबोधनमपि काव्यस्य प्रयोजनत्वेन स्वीक्रियते। राष्ट्रमेव देवः, तस्य प्रबोधनं काव्येन भवितुं शक्यते। राष्ट्रप्रबोधाय काव्यं भवति इति स्वातन्त्र्यसङ्ग्रामे अपि दृश्यते। क्रान्तिकारिणः काव्यमाध्यमेन स्वतन्त्रतायै आन्दोलनानि कृतवन्तः। अस्मिन् सन्दर्भे आचार्येण नाट्यशास्त्रस्य उल्लेखः क्रियते यथा -

**"राष्ट्रदेवप्रबोधोऽपि विश्वदैवतसाक्षिकः।**
**काव्यप्रयोजनं पुंभ्यः पुमर्थाँश्चतुरो दुहन्।।**
**इदं प्रयोजनं नाट्याचार्यस्य भरतस्य नः।**
**वेदशास्त्रे प्रयोगाश्च तदाश्रित्य प्रवर्त्तिताः।।"**[१]

पुरा देवदानवेषु युद्धपरिस्थितौ, वेदानां व्यवहारवैयर्थ्ये, मानवेषु च शूद्रस्वभाववत्सु भरतेन नाट्यवेदः व्यरच्यत। काव्यस्य तावान् महिमा वर्तते यत् तेन समाजे नवचेतनासंचारो भवितुं शक्यते। तस्मात् राष्ट्रदेवप्रबोधोऽपि काव्यस्य प्रयोजनम्।

काव्यं कस्यचिदेकस्य एव सामाजिकवर्गस्य कृते न निर्मीयते अपितु सामान्योऽपि जनः मातुः स्तन्यमिव रसास्वादनं कर्तुं शक्नोति। मातुः स्तन्यं गुणम् अवगुणं च न पश्यति तथैव काव्यं भावकस्य वर्णभेदं वर्गभेदं च न पश्यति, केवलं रसधारामेव प्रवाहयति भावकान् च आह्लादयति। काव्यं कला अस्ति, सा च सर्वतोदिक्का, सर्वत्र गन्तुमर्हा अतः समाजस्य सर्ववर्गस्य परिपोषणं काव्येन क्रियते।

आचार्यस्य रेवाप्रसादस्य मतानुसारं काव्यस्य उभयथा निष्प्रयोजनं सप्रयोजनं चात्र वर्णितम्। सूक्ष्मदृष्ट्या पश्यामश्चेत् एतानि प्रयोजनानि त्रिविधानि दृश्यन्ते - काव्यस्य निष्प्रयोजनं कवेः कृते, युगावश्यकतादित्रयं कविभावकयोः कृते, अन्तिमं च सामाजिकानां कृते। इत्थं काव्यालङ्कारकारिकानुसारं काव्यप्रयोजनमत्र प्रस्तुतम्।

## अभिराजयशोभूषणानुसारं काव्यप्रयोजनम्

आचार्यः अभिराजराजेन्द्रमिश्रः अभिराजयशोभूषणे प्रथमे उन्मेषे स्वाभिमतं काव्यप्रयोजनं प्रस्तौति। आदौ तावदाचार्येण प्रयोजनं नाङ्गीक्रियते। कवेः काव्यकरणव्यापारे अर्थादयो लाभाः न प्रमुखाः। कविः धनादिनां कृते काव्यं न निर्माति। उक्तं च तेन -

**"न धनाय न पुण्याय व्यवहाराय नाऽपि वा।**
**न च सद्यः सुखार्थाय काव्यं निर्मात्ययं कविः।।"**[१]

---

[१] तत्रैव - १५, १६ (मूलकारिका)

अनेन मम्मटादीनामाचार्याणां काव्यप्रयोजनं प्रति आचार्यस्य अप्रीतिः प्रतियते। वस्तुतस्तु प्राणिनां किञ्चित् स्वाभाविकं कर्म भवत्येव, यदकृत्वा सः प्राणी शान्तिं न लभते। तथैव कविः काव्यम् अकृत्वा आनन्दं शान्तिं च न लभते। यथा भ्रमरः प्रयोजनं विनैव गुञ्जनं करोति तथैव कविरपि स्वभावत एव काव्यं निर्माति। उक्तं यत् -

**"यथा नोत्पतितुं शक्तो भ्रमरो गुञ्जनादृते।**
**तथा कविरयं काव्यादृते शक्तो न जीवितुम्।।"**[२]

काव्यं तु जन्मजन्मान्तराणां सत्फलमस्ति। काव्यं कवेः स्वभावेन सह अन्वितं भवति। यद् वस्तु स्वभावात् भिन्नं भवति तत् प्रयोजनयुक्तं स्यान्नाम, नैसर्गिकं स्वभावान्तर्भूतं वस्तु कर्म वा कथं सप्रयोजनं भवेत्? कदापि न। तस्मात् काव्ये प्रयोजनविषये चर्चाऽपि न कार्या। उक्तं च -

**"यन्निसर्गाद्बहिर्भूतं तद्भवेत् सप्रयोजनम्।**
**निसर्गे क्व पुनस्तस्य चर्चाऽनास्थाविवर्धिनी।।"**[३]

एवमाचार्यः अभिराजराजेन्द्रमिश्रः काव्यं निष्प्रयोजनं प्रत्यपादयत्। काव्यकरणे कवेः किमपि प्रयोजनं नास्ति किन्तु विद्वांसः यदि अत्यन्तम् आग्रहं कुर्वन्ति चेत् काव्ये एकमेव प्रयोजनं भवितुनर्हति - यशः। यशसा एव कविः भूमौ चिरं जीवति तथा परत्र राजते। कविकर्म विहाय अन्यत् किमपि कर्म नास्ति येन सर्वत्र यशःप्राप्तिः भवेत्। अतः उक्तम् -

**"पश्यन्त्येव यदि प्राज्ञाः काव्यसृष्टौ प्रयोजनम्।**
**परत्रेह च निर्व्याजं यशस्तन्मेऽभिरोचते।।"**[४]

एवम् अभिराजयशोभूषणे आचार्यमिश्रेण प्रथमं तावत् काव्यं निष्प्रयोजनं, ततश्च महता आग्रहेण काव्यं यशोमात्रप्रयोजनम् उक्तम्।

## अभिनवकाव्यालङ्कारसूत्रानुसारं काव्यप्रयोजनम्

आचार्यो राधावल्लभः त्रिपाठी अभिनवकाव्यालङ्कारसूत्रे प्रथमे अधिकरणे द्वितीये अध्याये काव्यस्य प्रयोजनमाह - "मुक्तिस्तस्य प्रयोजनम्"[१] इति। काव्यस्य प्रयोजनं मुक्तिः अस्ति। मुक्तिः नाम

---

[१] अभिराजयशोभूषणम् - १.२३

[२] तत्रैव १.२५

[३] तत्रैव १.२७

[४] तत्रैव १.२८

किम् ? "मुक्तिश्चावरणभङ्गः"[२]। आवरणभङ्गः मुक्तिः। किं नाम आवरणम्? सङ्कुचितप्रमातृत्वम्[३] । कः पुनरयं प्रमाता? कविः सहृदयश्च[४] । कवेः सहृदयस्य च चैतन्यसङ्कोचः सङ्कुचितत्वम् उच्यते[५] । राधावल्लभवर्यस्य प्रतिपादनशैली दार्शनिकी प्रतीयते। तेन उच्यते यत् सृष्टेः चेतना यथा आधिभौतिकी आधिदैविकी आध्यात्मिकी च भवति तथैव मुक्तिरपि त्रिधा।[६] एताः मुक्तयः परस्परम् अनुषक्ताः सन्ति।[७] अर्थात् एकस्यां जातायाम् अन्या स्वयमेव जायते। इदं शरीरं भौतिकम् उच्यते, तेन सम्बद्धा मुक्तिः आधिभौतिकी। सर्वे सुखिनो भवन्तु, शरीरपोषणाय सर्वे अन्नादीनि लभन्ताम्, निवासाय गेहं तथा लोकलज्जावारणाय शरीररक्षणाय च वस्त्राणि लभेरन्, एषा एव आधिभौतिकी मुक्तिः कथ्यते।[८] आधिदैविकी मुक्तिः मनसा सम्बद्धा अस्ति। मनसः प्रसन्नता मालिन्यस्य च अभावः आधिदैविकी मुक्तिः कथ्यते।[९] आत्मनि स्वरूपावस्थानं वा मोक्षप्राप्तिरेव आध्यात्मिकी मुक्तिरुच्यते।[१०] एषा त्रिविधाऽपि मुक्तिः काव्येन साहित्यसाधनया वा लब्धुं शक्या अतः मुक्तेः साधनं काव्यम्।[११] एषा त्रिविधा मुक्तिः चेतनायाः त्रैविध्येन पुनस्त्रिधा भवति - वैयक्तिकी, सामाजिकी, ब्रह्माण्डीया च। काव्येन व्यक्तेः एव मुक्तिर्न भवति अपितु तया सह समाजस्य सम्पूर्णस्य ब्रह्माण्डस्य च मुक्तिः भवति।[१२] एवम् आचार्यस्य राधावल्लभस्य मतानुसारं मुक्तिः काव्यप्रयोजनम्।

## आचार्यरेवाप्रसाद-राजेन्द्रमिश्रयोः प्रयोजनमतस्य खण्डनम्

आचार्यौ रेवाप्रसाद-राजेन्द्रमिश्रौ काव्यं निष्प्रयोजनम् इति यदुक्तवन्तौ तत्र राधावल्लभस्य अप्रीतिः अभिलक्ष्यते। सः द्वयोः मतं खण्डयन् कथयति - " काव्यस्य प्रयोजनं नास्ति इति यः पक्षः उपस्थापितः सः चिन्त्यः। कलविङ्कस्य कलरवे भ्रमरस्य च गुञ्जने आनन्दावाप्तिः प्रयोजनम्। यच्च

[१] अभिनवकाव्यालङ्कारसूत्रम् १.२.१

[२] तत्रैव १.२.४

[३] तत्रैव १.२.५

[४] तत्रैव १.२.६

[५] तत्रैव १.२.७

[६] तत्रैव १.२.२

[७] तत्रैव १.२.३

[८] तत्रैव वृत्तौ पृ. ४०,४१

[९] तत्रैव वृत्तौ पृ. ४१

[१०] तत्रैव वृत्तौ पृ. ४१

[११] तत्रैव वृत्तौ पृ. ४३

१२ तत्रैव वृत्तौ पृ. ४१

स्वाभाविकं कर्म अकृत्वा कविः शान्तिं न लभते इति उक्तं तदपि चिन्त्यम्। तत्र शान्तिः एव प्रयोजनं दृश्यते। शान्तिश्च तेषाम् अस्मत्प्रतिपादिता मुक्तिरेव।[1] केवलं यश एव प्रयोजनमिति राजेन्द्रमिश्रवर्यस्य मतम् आक्षिपति त्रिपाठिवर्यः - कविस्तु प्रजापतिः, स च यशस्कामः काव्यसृष्टिं निर्माति? नैव, प्रजापतिरिव कविरपि निर्व्याजं काव्यं रचयति, तस्मात् इदं मतम् असत्।[2] एवम् आचार्यः राधावल्लभः द्वयोरपि मतं खण्डयति।

क्रमेण त्रयाणामपि प्रयोजनानि अवलोक्य प्रतीयते यत् त्रयोऽपि आचार्याः विचक्षणाः विद्यन्ते। आचार्य-रेवाप्रसाद-राजेन्द्रमिश्रौ काव्यं निष्प्रयोजनमङ्गीकुरुतः। राधावल्लभः द्वयोः खण्डनं कृतवान्। पुनश्च काव्यं सप्रयोजनमिति उक्त्वा रेवाप्रसाद-राजेन्द्रमिश्राभ्यां कानिचन प्रयोजनानि स्वीक्रियन्ते। त्रयाणं मतेषु रेवाप्रसादस्य मतं प्राचीनेभ्यः भिन्नम्, राजेन्द्रमिश्रस्य मतं प्राचीनानां यशः प्रयोजनम्, राधावल्लभस्य च षड्विधा मुक्तिरिति विचारे "काव्यात् चतुर्वर्गफलावाप्तिः" इति प्राचीनमतस्य नवीनरीत्या उपस्थापनं दृश्यते। अनेन आधुनिकं काव्यं प्राचीनैः सह आधुनिकैः प्रयोजनैरपि युक्तं भवतीति ज्ञायते।

## सन्दर्भग्रन्थसूचिः

१. काव्यालङ्कारकारिका, प्रो. रेवाप्रसाद-द्विवेदी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९७७

२. अभिराजयशोभूषणम्, अभिराज प्रो. राजेन्द्रमिश्रः, वैजयन्त प्रकाशन, इलाहाबाद, २००६

३. अभिनवकाव्यालङ्कारसूत्रम्, प्रो. राधावल्लभः त्रिपाठी, सं. रमाकान्त पाण्डेय, जगदीश संस्कृत पुस्तकालय, जयपुर. २००९

४. पातञ्जलमहाभाष्यम्, पण्डित वेदव्रत, हरयाणा साहित्य संस्थान, रोहतक, १९६४

१ तत्रैव वृत्तौ पृ. ४५

२ तत्रैव वृत्तौ पृ. ४७